## लः परस्मैपदम् । (९९/२१५८)

लः इति षष्ठी [1]आदेशापेक्षा । [2]लादेशाः परस्मैपदसञ्ज्ञा भवन्ति । तिप्, तस्, झि । सिप्, थस्, थ । मिप्, वस्, मस् । शतृक्वसू च । परस्मैपदप्रदेशाः–'सिचि वृद्धिः परस्मैपदेषु' (७. २. १/२२९७) इत्येवमादयः ॥

## तङानावात्मनेपदम् । (१००/२१५६)

तङ इति प्रत्याहारो नवानां [3]वचनानाम् । आनः इति शानच्कानचोर्ग्रहणम् । पूर्वेण परस्मैपदसञ्ज्ञायां प्राप्तायां तङानयोरात्मनेपदसञ्ज्ञा[4] विधीयते । त, आताम्, झ । थास्, आथाम्, ध्वम् । इट्, वहि, महिङ् । आनः खल्वपि – शानच्कानचौ । लः इत्येव, कतीह निघ्नानाः (३. २. १२९/३१०९) । आत्मनेपदप्रदेशाः – '[5]अनुदात्तङित आत्मनेपदम्' (१. ३. १२/२१५७) इत्येवमादयः ॥

## तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः । (१०१/२१६०)

तिङोऽष्टादश प्रत्ययाः । । नव परस्मैपदसञ्ज्ञकाः, नवात्मनेपदसञ्ज्ञकाः । तत्र परस्मैप्रदेषु त्रयस्त्रिकाः यथाक्रमं प्रथममध्यमोत्तमसञ्ज्ञा भवन्ति । तिप्, तस्, झि इति प्रथमः[6] । सिप्, थस्, थ इति मध्यमः । मिप्, वस्, मस् इति उत्तमः । आत्मनेपदेषु – त, आताम्, झ इति प्रथमः । थास्, आथाम्, ध्वम् इति मध्यमः । इट्, वहि, महिङ् इति उत्तमः । प्रथममध्यमोत्तमप्रदेशाः – 'शेषे प्रथमः' (१. ४. १०८/२१६५) [7]इत्येवमादयः ॥

## तान्येकवचनद्विवचनबहुवचनान्येकशः । (१०२/२१६१)

तानि[8] एकवचनद्विवचनबहुवचनसञ्ज्ञानि भवन्ति । एकशः [9]एकैकं पदम् । तिप् इत्येकवचनम् । तस् इति द्विवचनम् । झि इति बहुवचनम् । एवं सर्वत्र[10] । एकवचनद्विवचनबहुवचनप्रदेशाः – '[11]बहुषु बहुवचनम्' (१. ४. २१/१८७) इत्येवमादयः ॥

## सुपः । (१०३/१८५)

तिङां त्रिकेषु एकवचनादिसञ्ज्ञा [12]विहिताः । सम्प्रति सुपां त्रिकेषु [13]विधीयन्ते । सुपश्च त्रीणि त्रीणि [14]पदानि [15]एकश एकवचनद्विवचनबहुवचनसञ्ज्ञानि भवन्ति । [16]सु इति एकवचनम् । औ इति द्विवचनम् । जस् इति बहुवचनम् । एवं सर्वत्र ॥

## विभक्तिश्च । (१०४/१८४)

त्रीणि [17]त्रीणि इत्यनुवर्तते । त्रीणि त्रीणि [18]विभक्तिसञ्ज्ञाश्च भवन्ति सुपस्तिङश्च । विभक्तिप्रदेशाः – 'अष्टन आ विभक्तौ' (७. २. ८४/३७१) इत्येवमादयः ॥

---

1. आदेशापेक्षया फ, लः इति षष्ठ्या आदेशाः उपस्थाप्यन्ते ह. 2. लादेशः ह. 3. वचनानाम् नास्ति ब. 4. अनेन इत्यधिकम् ह. 5. आत्मनेपदेष्वनचः ह. 6. पुरुषः इत्यधिकम् क. 7. एवम् नास्ति ह, युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः, अस्मदि उत्तमः इत्यधिकम् ह. 8. तिङः त्रीणि त्रीणि पदानि इत्यधिकम् अ. क. ड. फ, तानि सुपः त्रीणि त्रीणि पदानि भूत्वैक° ह. 9. एकैकशब्दः ह. 10. एकवचनद्विवचनबहुवचनसञ्ज्ञानि इत्यधिकम् क. 11. द्व्येकयोर्द्विवचनैकवचने (1.4.22/186) इत्यधिकम् अ.क.ड.ह. 12. विहिता ड. 13. विधीयते ड. 14. वचनानि अ. 15. एकशः एकैकं वचनं अ, एकशः नास्ति ब. ह. 16. सुप् क. 17. त्रीणि नास्ति ब. क. ड. ह. 18. विभक्तिसञ्ज्ञकाश्च अ. ह.